श्री भुवनेश्वरी पंजर स्तोत्रं

श्री भुवनेश्वरी पंजर स्तोत्रं

इदं श्री भुवनेश्वर्याः पंजरं भुवि दुर्लभं |
येन संरक्षितो मर्त्यो बाणैः शस्त्रैर्न बाध्यते || 1 ||

ज्वर मारी पशु व्याघ्र कृत्या चौराद्युपद्रवैः |
नद्यंबु धरणी विद्युत्कृशानुभुजगारिभिः |
सौभाग्यारोग्य संपत्ति कीर्ति कांति यशोऽर्थदं || 2 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः पूर्वेऽधिष्ठाय मां पाहि चक्रिणि भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रून् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 1 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः ममाग्नेयां स्थिता पाहि गदिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 2 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः याम्येऽधिष्ठाय मां पाहि शंखिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देव देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 3 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः नैर्ऋत्ये मां स्थिता पाहि खड्गिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 4 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः पश्चिमे मां स्थिता पाहि पाशिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 5 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः वायव्ये मां स्थिता पाहि सक्थिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 6 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः सौम्येऽधिष्ठाय मां पाहि चापिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 7 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः ईशेऽधिष्ठाय मां पाहि शूलिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 8 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः ऊर्ध्वेऽधिष्ठाय मां पाहि पद्मिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 9 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः अधस्तान्मां स्थिता पाहि वाणिनी भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 10 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः अग्रतो मां सदा पाहि सांकुशे भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 11 ||

ॐ क्रों श्रीं ह्रीं ऐं सौः पृष्ठतो मां स्थिता पाहि वरदे भुवनेश्वरि |

योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 12 ||

सर्वतो मां सदा पाहि सायुधे भुवनेश्वरि |
योगविद्ये महामाये योगिनीगणसेविते |
कृष्णवर्णे महद्भूते बृहत्कर्णे भयंकरि |
देवि देवि महादेवि मम शत्रुन् विनाशय |
उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं |
यदि शक्यमशक्यं तन्मे भगवति शमय स्वाहा |
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् || 13 ||

फलश्रुतिः |
प्रोक्ता दिङ्नवो देवि चतुर्दश शुभप्रदाः |
एतत् पंजरमाख्यातं सर्वरक्षाकरं नृणां || 1

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति |
न भक्ताय प्रदातव्यं नाशिष्याय कदाचन || 2

सिद्धिकामो महादेवि गोपयेन्मातृजारवत् |
भयकाले होमकाले पूजाकाले विशेषतः || 3

दीपस्यारंभकाले वै यः कुर्यात् पंजरं सुधीः |
सर्वान् कामानवाप्नोति प्रत्यूहैर्नाभिभूयते || 4

रणे राजकुले द्यूते सर्वत्र विजयी भवेत् |
कृत्या रोगपिशाचाद्यैर्न कदाचित् प्रबाध्यते || 5

प्रातःकाले च मध्याह्ने संध्यायामर्धरात्रके |
यः कुर्यात् पंजरं मर्त्यो देवीं ध्यात्वा समाहितः || 6

कालमृत्युमपि प्राप्तं जयेदत्र न संशयः |
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं न लगंति च |
पुत्रवान् धनवान्लोके यशस्वी जायते नरः || 7

इति श्रीभुवनेश्वरी पंजरस्तोत्रं संपूर्णं |